# SK-101 कठोपनिषत् शाङ्करभाष्योपेता

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) अधः यथाकामं पञ्च मन्त्रान् पूरयत। 1x5=5**

1) उशन् ह वै......॥

2) वैश्वानरः प्रविशत्य.......॥

3) स त्वं प्रियान्..........॥

4) यस्य ब्रह्म च...................॥

5) यः पूर्वं तपसो.............॥

6) यथादर्शे तथात्मनि..............॥

7) यदा सर्वे प्रभिद्यन्ते..............॥

**B) वाक्येनैकेन नीचैः प्रदत्तेषु पञ्चानाम् उत्तरं लिखत। 1x5=5**

1) कठोपनिषदः प्रयोजनं किम्?

2) किंविधं नचिकेतसं श्रद्धाऽऽविवेश?

3) नाशान्तमानसो वापि इत्यत्र अशान्तमानस इत्यस्य क अर्थः?

4) प्रवृह्य धर्म्यम् इत्यस्य कोऽर्थः?

5) मातृपितृसहस्रेभ्योऽपि हितैषिणा वेदेन किमुपदिष्टम्?

6) अस्य विस्रंसमानस्य इति मन्त्रे पुनरुक्तिः कथं निवार्यते?

7) संसारवृक्षस्य मूलं कुतः शुक्रम् इत्युच्यते?

**C) यथारुचि अत्र पञ्च समाधत्त। 3x5=15**

1) अनन्दनामानं लोकं कः गच्छति ?

2) किं पदं सङ्ग्रहेण ब्रवीमीत्युवाद यमः ?

3) तद्यच्छेच्छान्त आत्मनि इत्यस्य आशयः कः ?

4) एतद्वै तत् इत्यस्य अर्थः कः?

5) जनेषु सुप्तेषु को जागर्ति, किं वा स करोति ?

6) शरीरम् एकादशद्वारं - व्याख्यात।

7) ईश्वराणां लोकपालानाम् आदित्यादीनां नियतप्रवृत्तौ निमित्तं किम् ?

D) **यथाच्छन्दं निम्नदर्शितेषु त्रयः समाधेयाः।** **5x3=15**

1) श्रेयःप्रेयसी।

2) "ननु गतिश्चेदागत्यापि भवितव्यम्। कथं यस्माद्भूयो न जायते इति" इति शङ्कां समाधत्त।

3) सा काष्ठा सा परा गतिः - व्याख्यात।

4) यः पूर्वं तपसो इत्यादिमन्त्रं व्याख्यात।

5) गन्धर्वलोके कीदृग् आत्मनो दर्शनं शक्यम्?

E) **अधःप्रदत्तेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) यमेन प्रदत्तान् वरान् विवृणुत।

2) देहादिसंघातव्यतिरिक्तः आत्मा - साधयत।

***

RKMVERI/DSP/MAIS/2017-22/D2019/SK-102

## SK-102 ईशमुण्डकोपनिषदौ सशाङ्करभाष्ये।

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथेष्टं दशानाम् प्रश्नानां वाक्येन उत्तरं लिखत।** **1x10=10**

1) पूरयत – "तत्रापरा... अधिगम्यते॥"
2) पूरयत – "नायमात्मा प्रवचनेन... स्वाम्॥"
3) पूरयत – "समाने वृक्षे... वीतशोकः॥"
4) वायुरनिलममृतम् – कोऽर्थः।
5) ऊर्णनाभिदृष्टान्तेन किं विवक्षितं श्रुत्या।
6) "तदेतत् सत्यम्" – इत्यत्र परविद्यास्थले कोऽर्थः।
7) संन्यासनिष्ठैव ब्रह्मविद्या मोक्षसाधनं न कर्मसहितेति काभ्यां लिङ्गाभ्यामवगम्यते।
8) ईशावास्योपनिषत् कस्याः संहितायाः कतमोऽध्यायः।
9) ईशा वास्यम् – कोऽर्थः।
10) कर्मनिष्ठाधिकारिणां कृते केवलं कर्म विहितम् उत समुच्चितम्।
11) मनूक्तः स्थावरान्तसंसारगतिबोधकः श्लोकः कः।
12) भाष्यकारभगवत्पादाः मध्यदीपिकान्यायम् प्रयुज्य किमाहुः।

B) **यथेष्टं पञ्च मन्त्रान् प्रपूर्य यथाभाष्यं व्याख्यात।** **3x5=15**

1) "विद्याञ्चाविद्याञ्च...॥"
2) "अग्ने नय...॥"
3) "सत्यमेव जयते...॥"
4) "हिरण्मये परे कोशे...॥"
5) "ब्रह्मैवेदममृतम्...॥"
6) "प्राणो ह्येष यः...॥"
7) "स यो ह वै तत्...॥"

C) **यथाभिरुचि त्रीणि विशदयत।** **5x3=15**

1) श्रीशङ्करभगवत्पादपूर्वकालीना उपनिषद्व्याख्यातारः।
2) मुक्तिसाधनत्वेन कर्मणामुपयोगः।
3) "तेन त्यक्तेन भुञ्जीथाः" इतिमन्त्रांशं व्याख्यात।
4) अद्वैतवादप्रतिपक्षभूतो ज्ञानकर्मसमुच्चयवादः।
5) कृतलोकपरीक्षः किं कुर्यात्। आचार्यस्य च को नियमः।

D) **एकं यथाभाष्यं व्याख्यात।** **10x1=10**

1) कथम् अङ्गिरसा शौनककृतस्य प्रश्नस्योत्तरम् प्रदत्तमिति विशदीकुरुत।
2) प्रथममुण्डकस्य द्वितीयखण्डमाश्रित्य अपरविद्यानिन्दापुरःसरम् परविद्याप्राप्त्युपक्रमं वर्णयत।

***

## SK-103 छान्दोग्योपनिषदः शाङ्करभाष्यम् (6-7)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) किमर्थं षष्ठोऽध्याय आरभ्यते?

2) मनः कस्मिन् उपसंह्रियते?

3) स्वप्नान्तं नाम किम्?

4) तेजसा कार्यभूतेन किं प्रतिपत्तव्यम्?

5) संवृतिः नाम का?

6) स्वेदजसंशोकजयोः कुत्रान्तर्भावः प्रदर्शितः?

7) सर्वं च नामरूपादिकं केनांशेन सत्यमुच्यते?

8) तत्त्वमसीति वाक्यं किं निवर्तयति?

9) "मन्त्रविदेवास्मि नात्मवित्" कस्येदं वचनम्?

10) यो वै भूमा तत्किम्?

11) स्मरः कस्मात् भूयानित्युच्यते?

12) नारदः किं श्रुत्वा नातः परमस्तीति उपरराम?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) यथा सोम्यैकेन मृत्पिण्डेन....।

2) कुतस्तु खलु सोम्यैवं स्यादिति....।

3) तेषां खल्वेषां भूतानाम्.....।

4) षोडशकलः सोम्य पुरुषः....।

5) अथ यदास्य वाङ्मनसि सम्पद्यते....।

6) यत्र नान्यत्पश्यति नान्यत्...।

7) आहारशुद्धौ सत्त्वशुद्धिः...।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) सुषुप्तौ मनसः लये, जीवस्य सत्सम्पत्तिः।

2) परमेश्वरस्य जीवभावेन कार्यानुप्रवेशः।

3) तेजोबन्नसृष्टिविचारः।

4) कार्यस्य सन्मात्रत्वे वैशेषिकवैनाशिकमीमांसकपूर्वपक्षः तत्समाधानम्।

5) नारदसनत्कुमारसंवादः।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) सप्तमाध्यायस्य तात्पर्यं भाष्यानुसारं संक्षिपत।

2) एकविज्ञानेन सर्वविज्ञानमिति प्रतिज्ञां समन्त्रं व्याख्यात।

***

# SK-108 प्रश्नोपनिषत् शाङ्करभाष्यसहिता

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

## A) एकेन वाक्येन पदेन वा यथामति दश उत्तरत। **1x10 = 10**

1) पिप्पलादं प्रति भार्गवस्य प्रश्नः कः आसीत्।
2) ज्योतिषां पतिः कः।
3) मनोकृतमित्यस्य भाष्यार्थः कः।
4) आत्मनः प्राणः जायते इत्यत्र प्रदाता उपमा का।
5) पापपुण्याभ्यामुभाभ्यां कः लोकः जायते।
6) नवद्वारे देहे के जाग्रति?
7) अपानः कीदृशः अग्निः?
8) क्षेत्रज्ञस्य पुरुषनिर्वचनं किम्।
9) पञ्चमप्रश्नः कः।
10) किं तपः।
11) के दक्षिणं प्रतिपद्यन्ते।
12) चतुर्थप्रश्ने पिप्पलादाचार्यः केन पृष्टं प्रश्नमुत्तरयामास।

## B) सप्तसु पञ्च समाधत्त **3x5 = 15**

1) प्रश्नोपनिषदि द्वितीयप्रश्नस्वरूपं व्याख्यात।
2) प्राणोत्क्रमणस्य प्रक्रियां वर्णयत।
3) पुरुषस्य विवेकानर्हत्वं दृष्टान्तदार्ष्टान्तिकाभ्यां फलं किम्।
4) द्विमात्राविशिष्टाया ओङ्कारोपासनायाः फलं किम्।
5) आत्मचैतन्ये श्रुतिनिर्देशपुरःसरं विकल्पान् दर्शयत।
6) उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा- इत्यादिमन्त्रं व्याख्यात।
7) मन्त्रोक्तस्यार्थस्य विस्तारानुवादीदं ब्राह्मणमारभ्यते इत्यस्य कः अभिप्रायः।

C) **पञ्चसु त्रयं समाधत्त** **5x3 = 15**

1) द्वितीयप्रश्नानुसारं प्राणस्वरूपं प्रतिपादयत।

2) लिङ्गदेहस्य स्थितिं वर्णयत।

3) अण्डोत्पत्तिक्रमेण सूर्याचन्द्रमसावकल्पयत् इति उत्पत्तिक्रमं वर्णयत।

4) पञ्चमप्रश्ने षष्ठसप्तममन्त्रयोः आशयं वदत।

5) नदीदृष्टान्तेन जगतः पुरुषाश्रयत्वं प्रतिपादयत।

D) **एकं यथायथं समाधत्त** **10x1 = 10**

1) द्वितीयप्रश्नस्य सारं कथयत।

2) गार्ग्यप्रश्नपर्यालोचनपूर्वकम् अक्षरे सम्प्रतिष्ठां वर्णयत।

***

## SK-125 भगवद्गीता २,३,४ अध्यायाः शाङ्करभाष्यसहिताः।

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

A) **यथेष्टं दशानाम् प्रश्नानां वाक्येन उत्तरं लिखत।** **1x10=10**

1) पूरयत – "अग्नौ प्रास्ताहुतिः..."

2) पूरयत – "नैव धर्मी न चाधर्मी..."

3) पूरयत – "नेहाभिक्रमनाशो..."

4) भगवान् जगत् सृष्ट्वा केभ्यः प्रवृत्तिलक्षणं धर्मम् बोधयामास, केभ्यश्च निवृत्तिलक्षणम्।

5) को धर्मः।

6) भाष्ये नैष्कर्म्यशब्दस्य कोऽर्थः।

7) त्रैगुण्यशब्दः द्वितीयाध्याये कस्मिन् श्लोके प्रयुक्तः, तस्य च कोऽर्थः।

8) आत्मदर्शने किं करणम्।

9) "ऐश्वर्यस्य समग्रस्य..." इत्यादिश्लोकम् पूरयत।

10) "यज्ञार्थात्कर्मणोऽन्यत्र..." इत्यादिश्लोके यज्ञशब्दस्य कोऽर्थः, तत्र प्रमाणभूता श्रुतिश्च का।

11) सर्वत्र के द्वे बुद्धी उपलभ्येते।

12) प्रत्यवायस्य को दृष्टान्तो दर्शितो भाष्यकारपादैः।

B) **यथेष्टं पञ्च उत्तरत।** **3x5=15**

1) "लोकेऽस्मिन्...॥" इति श्लोकं व्याख्यात।

2) "न कर्मणामनारम्भात्...॥" इति श्लोकं व्याख्यात।

3) "यस्त्वात्मरतिः...॥" इति श्लोकं व्याख्यात।

4) "सदृशं चेष्टते...॥" इति श्लोकं व्याख्यात।

5) भगवद्गीताशास्त्रस्य अनुबन्धचतुष्टयम्।

6) "न हि शीतोष्णादि प्रमाणैर्निरूप्यमाणं वस्तुसद्भवति" – सप्रसङ्गं व्याख्यात।

7) "अथ केन..." इत्येवम् अनर्थमूलस्य विषये अर्जुनस्य पुनःप्रश्नः कथमुपपद्यते।

C) **यथाभिरुचि त्रीणि विशदयत।** **5x3=15**

1) जनकादयः कर्मणा संसिद्धिमास्थिताः इत्यत्र द्वेधा व्याख्यानं किम्।

2) लोकसङ्ग्रहार्थं कर्मणः कर्तव्यता कथमागता।

3) अविद्वान् कथं कर्मसु सज्जते, तत्त्वविच्च कथं न सज्जते।

4) भगवन्मतम् अनुतिष्ठताम् अननुतिष्ठताञ्च किम् भवति।

5) सर्वेषां जन्तूनाम् प्रकृतिसदृशचेष्टायाम् अवगतायां शास्त्रानर्थक्यं कथमागतं तच्च कथं निवारितम्।

D) **एकं व्याख्यात।** **10x1=10**

1) असक्तः कर्म आचरन् पूरुषः कथम् परमाप्नोति।

2) भगवद्गीतोक्तबुद्धिद्वयदृष्ट्या स्वामिविवेकानन्दपादीयकर्मयोगस्य स्वरूपविचारः।

***

# SK-132 ब्रह्मसूत्रशाङ्करभाष्यम्(1.3-4)

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) भूमाधिकरणस्य विषयवाक्यं किम्?
2) ईक्षतिकर्माधिकरणस्य पूर्वपक्षः कः?
3) अक्षराधिकरणस्य संशयः कः?
4) "अन्यार्थश्च परामर्श" इति कस्याधिकरणस्य सूत्रम्?
5) कः स्फोटः?
6) कः जानश्रुतिं शूद्रशब्देन परामृशति?
7) "एष संप्रसादोस्माच्छरीरात्समुत्थाय...” इति विषयवाक्यं कस्या उपनिषदः?
8) "वर्णा एव शब्द" इति कस्य मतम्?
9) कतम आत्मेति योयं विज्ञानमयः प्राणेषु इति कस्याधिकरणस्य विषयवाक्यम्?
10) प्राणादिका सृष्टिश्रुतिः का?
11) जीवेश्वरयोरभेदेन सङ्कीर्तने आश्मरथ्यस्य अभिप्रायः कः?
12) 'समाकर्षात्' इति सूत्रं कस्मिन्नधिकरणे पठ्यते?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अत एव च नित्यत्वम्।
2) अन्यभावव्यावृत्तेश्च।
3) अन्यार्थश्च परामर्शः।
4) कम्पनात्।
5) वाक्यान्वयात्।
6) आत्मकृतेः परिणामात्।
7) भेदव्यपदेशात्।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) भूमाधिकरणम्।

2) देवताधिकरणम्।

3) प्रमिताधिकरणम्।

4) द्युभ्वाद्यधिकरणम्।

5) प्रकृत्यधिकरणम्।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) दहराधिकरणस्य विवक्षितार्थं सप्रमाणं संक्षिपत।

2) वाक्यान्वयाधिकरणं ससूत्रं वर्णयत।

***

## SK-133 ब्रह्मसूत्रशाङ्करभाष्ये द्वितीयाध्यायस्य प्रथमद्वितीयतृतीयपादाः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **एकेन वाक्येन पदेन वा उत्तरत।** **1x10=10**

1) ईश्वरस्य निर्मातृत्वं किं सापेक्षम्?
2) प्रधानकारणवादे जगद्रचना किमर्थं नोपपद्यते?
3) “स्मृतिबलेन प्रत्यवतिष्ठमानस्य......।"पूरयत।
4) स्वशब्दोन्मानाभ्यामिति सूत्रे उन्मानशब्दार्थः कः?
5) स्वात्मनाचोत्तरयोः इति सूत्रे उत्तरयोः कयोः ग्रहणम्?
6) उत्क्रान्तिः नाम का?
7) वैशेषिकनये परिमाणे के?
8) प्रवृत्तेश्च इति सूत्रे पूर्वसूत्रात् किमनुवर्तते?
9) “द्वैतिनो हि ते साङ्ख्यायोगाश्चे”ति कस्य उक्तिः?
10) माहेश्वरमते के पदार्थाः?
11) विवसनमते के पदार्थाः?
12) पशुपतिः जगतः कीदृशं कारणम्?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) “उत्क्रान्तिगत्यागतीनाम्।”सूत्रार्थं वर्णयत।
2) श्रुतेः तर्कसापेक्षतां यथाभाष्यं गमयत।
3) “देवादिवदपि लोके” व्याख्यात।
4) “सर्वोपेता च तद्दर्शनात्” सूत्रार्थं यथाभाष्यमुपपादयत।
5) भोक्त्रापत्त्यधिकरणदृष्टान्तं संगमयत।
6) न च कर्तुः करणम् इति सूत्रं व्यख्यात।
7) “अश्मादिवच्च तदनुपपत्तिः” इति सूत्रं यथाभाष्यं वर्णयत।

C) **पञ्चसु त्रीणि समाधत्त।** **5x3=15**

1) सर्वोपेताधिकरणमारचयत।

2) भागवतमतमुपस्थापयत।

3) इतरव्यपदेशाधिकरणं संगृह्णीत।

4) पाशुपतमतं यथाभाष्यम् उपस्थाप्य खण्डयत।

5) प्रयोजनवत्त्वाधिकरणं व्याख्यात।

D) **एकम् यथाग्रन्थं समाधत्त।** **10x1=10**

1) वियदधिकरणमारचयत।

2) रचनानुपपत्त्यधिकरणमारचयत।

***

## SK-135 ब्रह्मसूत्रशाङ्करभाष्यम्(3.2-3)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथाकामं दश प्रश्नाः समाधेयाः।** **1x10=10**

1) सेतुव्यपदेशः कस्मिन्मन्त्रे उपलभ्यते?
2) संराधनकाले योगिन आत्मानं पश्यन्ति इत्यत्र श्रुतिप्रमाणं किम्?
3) जीवस्य कति अवस्थाः भवन्ति?
4) 'अतः प्रबोधोऽस्मात्' इति सूत्रं कस्मिन्नधिकरणे पठितम्?
5) न तावन्मुग्धो जागरितावस्थः, कुतः?
6) मुच्छावस्था न मरणे अन्तर्भवति, कुतः?
7) 'निर्विशेषं परं ब्रह्म' इति कस्मादधिकरणादवगम्यते?
8) केषामविशेषेण गतिर्भवितुमर्हति?
9) 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यत्र आत्मशब्देन कः गृह्यते?
10) आध्यानाधिकरणस्य विषयवाक्यं किम्?
11) आत्मगृहीत्यधिकरणे कस्याः उपनिषदः मन्त्रः विषयवाक्यत्वेन स्वीकृतः?
12) कासु विद्यासु गतिः नार्थवती?

B) **यथारुचि पञ्च विव्रियन्ताम्।** **3x5=15**

1) निर्मातारं चैके पुत्रादयश्च।
2) प्रकाशवच्चावैयर्थ्यात्।
3) धर्मं जैमिनिरत एव।
4) उभयव्यपदेशात्त्वहिकुण्डलवत्।
5) यावदधिकारमवस्थितिराधिकारिकाणाम्।
6) सूचकश्च हि श्रुतेराचक्षते च तद्विदः।
7) दर्शयति च।

C) **यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) मुग्धाधिकरणम्।

2) संध्यधिकरणम्

3) पराधिकरणम्।

4) यावदधिकाराधिकरणम्।

5) सर्ववेदान्तप्रत्ययाधिकरणम्।

D) **अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) प्रकृतैतावत्त्वाधिकरणमुखेन ब्रह्मणः निषेधराहित्यं वर्णयत।

2) पराधिकरणसाहाय्येन सेतुश्रुत्यर्थं निरूपयत।

***

# SK-151 पञ्चदशी (१ तः ५ अध्यायं यावत्)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथाकामं दश प्रश्नाः समाधेयाः।** **1x10=10**

1) किं नाम श्रवणम्?
2) विद्यारण्यस्य गुरुः कः?
3) स्पष्टशब्दादियुक्तेषु किमतिस्फुटम्?
4) पञ्चदशीग्रन्थस्य साम्प्रदायिकं व्याख्यानं किम्?
5) सौषुप्तिकसंविदोऽस्तित्वे किं प्रमाणम्?
6) सूक्ष्मभूतानां मिलितेभ्यः रजोंऽशेभ्यः किमुत्पद्यते?
7) केन परां निर्वृतिं लभन्ते?
8) विद्यारण्यस्य गुरुः कः?
9) गौडाचार्याः निर्विकल्पसमाधिं किमिति प्राहुः?
10) दशेन्द्रियाध्यक्षं किम्?
11) भूतपञ्चकं किमर्थं प्रविविच्यते?
12) केन मनोराज्यं जेतुं शक्यम्?

**B) यथारुचि पञ्च विव्रियन्ताम्।** **3x5=15**

1) द्वैतावज्ञा सुस्थिता चेदद्वैते धीः स्थिरा भवेत्।
2) माहेश्वरी तु माया या तस्या निर्माणशक्तिवत्।
3) आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत्।
4) परिपूर्णः परात्माऽस्मिन्देहे विद्याधिकारिणि।
5) गौडाचार्या निर्विकल्पे समाधावन्ययोगिनाम्।
6) शक्यं जेतुं मनोराज्यं निर्विकल्पसमाधितः।
7) स्वतःपूर्णः परात्माऽत्र ब्रह्मशब्देन वर्णितः।

C) **यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) आत्मनः संविद्रूपत्वं परमानन्दरूपत्वं च।

2) श्रवणमननादिज्ञानसाधनानि।

3) आत्मनः कारणादिशरीरत्रयम्।

4) महावाक्येन जीवब्रह्मणोरैक्यविचारः।

5) अन्वय-व्यतिरेकाभ्यां कोशातिरिक्तात्मस्वरूपम्।

D) **अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) पञ्चानां कोशानां परिचयपूर्वकं, कोशविवेकप्रक्रियया यथाग्रन्थम् आत्मस्वरूपप्रतिपत्तिप्रकारं वर्णयत।

2) जीवस्य अवस्थात्रयं विचार्य, तत्र संविदेकत्वं यथाग्रन्थं निरूपयत।

***

# SK-164 आगमप्रकरणात् सम्पूर्णा

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **एकेन वाक्येन पदेन वा उत्तरत।** **1x10=10**

1) कीदृशं वाक्यं प्रमाणम्?
2) वाक्यजन्यज्ञाने कानि कारणानि?
3) आकांक्षालक्षणं किम्?
4) योग्यतालक्षणं किम्?
5) आगमस्य द्वैविध्यं कथम्?
6) करणे अर्थापत्तिशब्दे कः समासः?
7) यागस्य क्षणिकत्त्वात् स्वर्गसाधनत्वम् अनुपपन्नमिति तत्र किं कल्प्यते?
8) योग्यानुपलब्धिः इत्यत्र सिद्धान्त्यभिमतः कः समासः?
9) अनुपलब्धेः योग्यता का?
10) फलवैजात्यं विना कथं प्रमाणभेदः?
11) प्रयोजनलक्षणं किम्?
12) मननं नाम किम्?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) ब्रह्मणो नव लक्षणानि लिखन्तु।
2) जहदजहल्लक्षणाविषये साम्प्रदायिकानां मतं लिखन्तु।
3) वाक्यैकवाक्यता कुत्र भवति इति यथाग्रन्थं प्रतिपादयन्तु।
4) अभिहितानुपपत्तिं प्रतिपादयन्तु।
5) सोपाधिकभेदं निरुपाधिकभेदं यथाग्रन्थं प्रतिपादयन्तु।
6) ब्रह्माण्डस्य चतुर्विधस्थूलशरीराणां चोत्पत्तिप्रक्रियां लिखन्तु।
7) जाग्रत्स्वप्नसुषुप्तिस्वरूपं यथाग्रन्थं लिखन्तु।

C) **पञ्चसु त्रीणि समाधत्त।** **5x3=15**

1) अर्थापत्तिसामान्यलक्षणं प्रतिपादयन्तु।

2) सा चान्तःकरणवृत्तिरावरणाभिभवार्था इति मतस्य व्याख्या कार्या।

3) श्रवणमनननिदिध्यासनेषु मध्ये ब्रह्मसाक्षात्कारे किं प्रधानं कारणम् किं परम्परया कारणमिति लिखन्तु।

4) आगमप्रकरणानुसारेण लक्षणाविचारमुपस्थापयत।

5) प्रयोजनपरिच्छेदसारं लिखत।

D) **एकम् यथाग्रन्थं समाधत्त।** **10x1=10**

1) सभेदं प्रलयस्वरूपं यथाग्रन्थं प्रतिपादयन्तु।

2) ब्रह्मणः स्वरूपलक्षणं तटस्थलक्षणं च यथाग्रन्थं प्रतिपादयन्तु।

***

# SK-167 सिद्धान्तलेशसंग्रहः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

## A) द्वादशसु दश समाधत्त। **1x10=10**

1) अपूर्वविधेः उदाहरणं किम्?
2) अनन्यव्यापारत्वस्य मुक्त्युपायत्वे श्रुतिप्रमाणं किम्?
3) शब्दात् निर्विचिकित्सं परोक्षज्ञानमेवोत्पद्यते, कस्य मते?
4) गुरूपसदनविधिः कः?
5) मेघाकाशतुल्यो धीवासनाप्रतिबिम्बः कः?
6) अनात्मदर्शनेनैव परात्मानमुपास्महे, कस्य वचनमिदम्?
7) वाचस्पतिमिश्रमते जगदुपादानकारणं किम्?
8) जननहरणी सूक्तिः का?
9) "योऽयं स्थाणुः पुमानेषः पुंधिया स्थाणुधीरिव" इति कुत्र प्रोक्तम्?
10) नानाजीववादे श्रुतिप्रमाणं किम्?
11) संक्षेपशारीरके अविद्यायां चित्प्रतिबिम्बः कः?
12) मायाशबलमीश्वररूपमेव ब्रह्म उपादानमिति के वदन्ति?

## B) सप्तसु पञ्च समाधत्त। **3x5=15**

1) वाचस्पतिमतरीत्या विध्यभावपक्षं निरूपयत।
2) मङ्गलश्लोकस्य तात्पर्यमुल्लिखत।
3) अवच्छेदपक्षं निरूपयत।
4) परिणामविवर्तलक्षणविचारं कुरुत।
5) श्रवणविधौ प्रकटार्थकारमतं व्याख्यात।
6) मायोपादानत्वविचारे संक्षेपशारीरककृन्मतं विस्तारयत।
7) ब्रह्मणः कीदृशं कर्तृत्वमिति व्याख्यात।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) मायायाः जगत्कारणत्वं विचारयत।

2) ब्रह्मोपादानत्वविचारं सप्रमाणं कुरुत।

3) श्रवणवाक्ये नियमविधिं साधयत।

4) पञ्चदश्यनुसारं जीवेश्वरविभागं प्रदर्शयत।

5) सर्वज्ञत्ववादं ग्रन्थदिशा संक्षिपत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) श्रवणवाक्ये परिसंख्याविधिपक्षं दूषयित्वा नियमविधिपक्षं सप्रमाणं साधयत।

2) ग्रन्थदिशा प्रतिबिम्बपक्षनिराकरणपूर्वकम् अवच्छेदपक्षं सोदाहरणं निरूपयत।

***

RKMVERI/DSP/MAIS/15-20/D2019/SK-171

## SK-171 अद्वैतसिद्धिः (आदितः दृश्यत्वान्तः भागः)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **एकेन वाक्येन पदेन वा उत्तरत।** **1x10=10**

1) चतुर्थमिथ्यात्वलक्षणस्य केन साकं साम्याशङ्का?

2) उपादानत्वं नाम किम्।?

3) दृश्यत्वं नाम किम्?

4) ज्ञाननिवर्त्यत्वं नाम किम्?

5) मिथ्यात्वस्य मिथ्यात्वे कः दोषः?

6) मोक्षं प्राप्त इव कः विजयते?

7) अद्वैतसिद्धिः केषां मुदे?

8) अद्वैतसिद्धये प्रथमं किमुपपादनीयम्?

9) प्राचीनमते पक्षतालक्षणं किम्?

10) आहार्यसंशये दृष्टान्तः कः?

11) मिथ्यात्वे विप्रतिपत्तिः का?

12) मङ्गलोक्तः विष्णुः कः?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) विप्रतिपत्तिजन्यसंशयस्य विचारानङ्गत्वेऽपि व्युदसनीयतया विचाराङ्गत्वमस्त्येव?

2) गुणादिकं गुण्यादिना भिन्नाभिन्नं समानाधिकृतत्वात्।

3) तस्मात् लौकिकपरमार्थरजतमेव नेदं रजतमिति निषेधप्रतियोगि।

4) स्मृतित्वेन स्मृतेः संस्कारनिवर्तकत्वे मानाभावात्।

5) लक्षणया अशुद्धत्वमस्वप्रकाशत्वव्यापकम्।

6) प्रमाणसिद्धत्वञ्चाबाध्यत्वव्यापकमित्यन्यत्।

7) चतुर्थमिथ्यात्वलक्षणसमन्वयं प्रदर्शयत।

C) **पञ्चसु त्रीणि समाधत्त।** **5x3=15**

1) विप्रतिपत्तेः विचाराङ्गत्वं सिद्धान्तयत।

2) ज्ञाननिवर्त्यत्वम्।

3) प्रथमलक्षणस्य विकल्पत्रयं सदोषमुपपादयत।

4) गुणादिकं गुण्यादिना भिन्नाभिन्नं समानाधिकृतत्वात्।

5) मङ्गलाचरणं व्याख्यात।

D) **एकम् यथाग्रन्थं समाधत्त।** **10x1=10**

1) दृश्यत्वस्य षड्विल्पान् व्याख्यात।।

2) चतुर्थमिथ्यात्वलक्षणस्य सारं संगृह्णीत।

***

## SK-182 पञ्चपादिका

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

A) **एकेन वाक्येन पदेन वा उत्तरत।** **1x10=10**

1) नमाम्यभोगि.....।
2) "युष्मदस्मत्..." इत्यारभ्य नैसर्गिकोयं लोकव्यवहारः इत्यन्तं भाष्यं केन भाष्येण पर्यवस्यति?
3) अस्यानर्थहेतोः इत्यनेन पर्यवस्यत् भाष्यं किं प्रतिपादयति?
4) विषयप्रयोजनयोः प्रथमसूत्रे अर्थात् सूत्रितत्वं केन भाष्येण प्रतिपाद्यते?
5) तस्माच्छुद्धमेवार्थं स्मृतिः अवभासयति, न ज्ञानानुविद्धम् इति कस्य उक्तिः?
6) अध्यासलक्षणं किम्?
7) "शुद्धमेवार्थं स्मृतिः अवभासयति, न ज्ञानानुविद्धम्" इति कस्य उक्तिः?
8) बुद्धेः कः आकारः?
9) प्रमोषः नाम कः?
10) रजतरूपेण शुक्तिरेव परिणमते इति उच्यते चेत् कः दोषः?
11) निद्रादि दोषोपप्लुतं मनः..... मिथ्यार्थविषयं ज्ञानमुत्पादयति।पूरयत।
12) नामादिषु ब्रह्मदृष्टिः ज्ञानम् उत मानसी क्रिया?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अध्यस्य मिथुनीकृत्य  इत्यत्र क्त्वा प्रत्ययान्तस्य पूर्वकालाद्यर्थत्वं निरस्यत।
2) अज्ञानस्य स्वरूपं यथाग्रन्थं विषदयत।
3) भगवत्पादवन्दनं ग्रन्थारम्भप्रतिज्ञाञ्च गमयत।
4) आद्यभाष्यद्वयस्य शास्त्रीयविषयप्रयोजनप्रतिपादने तात्पर्यमस्तीति गमयत।
5) भाष्यकारः किमर्थमध्यासं प्रथमतः प्रतिपादयति इति सप्रसंगं गमयत।
6) अनाद्यानन्दकूटस्थ इत्यादि मङ्गलश्लोकं व्याख्यात।
7) नमःश्रुति शिरः इत्यादि पद्यार्थं वर्णयत।

C) **पञ्चसु त्रीणि समाधत्त।** **5x3=15**

1) तमःप्रकाशयोरिव विषयविषयिणोः कीदृशः विरोधः, तस्य द्वैविध्यञ्च यथाग्रन्थमुपपादयत।

2) मिथ्याज्ञाननिमित्तः इति ग्रन्थस्य भावरूपानिर्वचनीयादज्ञानोपादानकत्वं प्रतिपाद्य भावरूपाज्ञाने प्रत्यक्षानुमानार्थापत्ति प्रमाणानि इति सूचयत।

3) अज्ञानस्य आत्मनि आवरणविक्षेपकृत्यद्वयवत्त्वं प्रतिपादयत।

4) प्रथमसूत्रेण सूचितविषयप्रयोजनहेतुभूतः अध्यासः इति प्रतिपादयत।

5) भाष्यकारकृतं तत्त्वानुस्मरणरूपं मङ्गलं प्रदर्श्य तस्य शिष्टत्वं प्रतिपादयत।

D) **एकम् यथाग्रन्थं समाधत्त।** **10x1=10**

1) भाष्यं प्रसन्न गम्भीरम् इति पद्मपादाचार्योक्तिं यथाव्याख्यानं सोदाहरणं द्रढयत।

2) मंगलपद्यानां विशेषार्थान् समालोचयत।

***

# SK-201 सिद्धान्तकौमुदी पञ्चसन्ध्यन्ता

कालावधिः - होराद्वयम् सत्रम् -5 पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) लघुसंज्ञाविधायकं सूत्रं किम्?

2) यवयोः बाह्यप्रयत्नाः के?

3) इ इन्द्रः इत्यत्र इ इत्यस्य प्रगृह्यसंज्ञा केन भवति?

4) वकारस्य उच्चारणस्थानं किम्?

5) दधयोः बाह्यप्रयत्नाः के?

6) सिद्धान्तकौमुदीकर्ता कः?

7) दधिँ इत्यत्र अनुनासिकः केन भवति?

8) प्रश्नः इत्यत्र नकारस्य ञकारः कुतो न?

9) के स्पर्शाः?

10) इन्द्रे च इत्यस्य उदाहरणं किम्?

11) अचश्च इति कीदृशं सूत्रम्?

12) हरेऽव इत्यत्र कः सन्धिः?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) शिवोऽर्च्यः इति प्रयोगस्य सिद्धिप्रक्रियां लिखन्तु।

2) शम्भू राजते इति प्रयोगस्य सिद्धिप्रक्रियां प्रदर्शयन्तु।

3) यलँ्लोकम्, यं लोकम् इति प्रयोगयोः सिद्धिप्रक्रियां प्रदर्शयत।

4) पुँस्कोकिलः, पुंस्कोकिलः इति प्रयोगयोः सिद्धिप्रक्रियां दर्शयत।

5) वाग्घरिः इति प्रयोगस्य सिद्धिप्रक्रियां प्रतिपादयन्तु।

6) सुद्ध्युपास्यः इति प्रयोगस्य सिद्धिप्रक्रियां प्रतिपादयत।

7) षट् ते, वागीशः इति प्रयोगयोः सिद्धिप्रक्रियां वर्णयन्तु।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) हलन्त्यम् इति सूत्रस्य व्याख्यां विलिखन्तु।

2) ऊकालोऽज्झस्वदीर्घप्लुतः इति सूत्रस्य व्याख्या कार्या।

3) झयो होऽन्यतरस्याम् इति सूत्रं व्याख्यात।

4) परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति परिभाषां व्याख्यात।

5) अनुस्वारस्य ययि परसवर्णः इति सूत्रं व्याख्यात।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) इको गुणवृद्धी इति सूत्रस्य व्याख्यानं कुर्वन्तु।

2) झरो झरि सवर्णे इति सूत्रं सपदकृत्यं व्याख्यात।

***

# SK-205 सिद्धान्तकौमुदी(शब्दाधिकारः)

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) अङ्गसंज्ञाविधौ तदादिग्रहणं किमर्थम् ?

2) उभशब्दः कुतः नित्यं द्विवचनान्तः ?

3) घिसंज्ञा केन सूत्रेण ?

4) “औतोऽम्शसोः" इत्यत्र पदच्छेदः कथम् ?

5) कृ इत्यत्रानङ्गुणौ कुतः नास्ति ?

6) हे अम्बाडे इत्यत्र ह्रस्वः कुतः ?

7) सखी इत्यत्र अनङ्णित्वे न। कुतः ?

8) स्वसाशब्दे दीर्घः केन सूत्रेण ?

9) हे वारे इति कथं  रूपम् ?

10) दधिशब्दस्य अनङादेशः केन सूत्रेण ?

11) युवावौ द्विवचने इत्यत्र द्विवचनस्य कोऽर्थः ?

12) भ्यसः भ्यमादेशपक्षे कुतो न एत्वम् ?

B) सप्तसु पञ्च समाधत्त। 3x5=15

1) 'अतिसर्वाय' इत्यत्र सर्वनामसंज्ञा कुतः न ?

2) उन्न्यौ इत्यत्र कथं यण् ?

3) प्रियत्रिः इत्यत्र कुतः न तिस्रादेशः ?

4) यूष्णा। ससूत्रं रूपं साधयत।

5) हरेः। ससूत्रं रूपं साधयत।

6) रमया। ससूत्रं रूपं साधयत।

7) त्वम्। ससूत्रं रूपं साधयत।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) कृत्तद्धितसमासाश्च। व्याख्यात।

2) हल्ङ्याप्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। वर्णयत।

3) एरनेकाचोऽसंयोगपूर्वस्य। विशदयत।

4) आतो धातोः। विवेचयत।

5) भ्यसो भ्यम्। विवृणुत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) न बहुव्रीहौ। व्याख्यात।

2) पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु।

***

# SK-209 वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त। 1x10=10**

1) "हीने" इत्यस्य सूत्रार्थं लिखत।
2) राजा पुरं वसेत् अत्र द्वितीया कथम्।
3) केन प्रयोजनेन इत्यत्र केन तृतीया।
4) गतिबुद्धिसूत्रे कीदृशम् अकर्मकत्वम् इष्टम्।
5) अभिनिविशश्च इति कस्य अपवादः।
6) स्वयम्भुवे नमस्कृत्य अत्र केन चतुर्थी।
7) द्रोहो नाम कः।
8) नदीम् अन्ववसिता सेना इत्यस्य कोऽर्थः।
9) अपवर्गे तृतीया इति सूत्रस्यार्थम् उदाहरणं च लिखत।
10) उप हरिं सुराः इत्यत्र उप इत्यनेन कः अर्थः द्योत्यते।
11) अधीती व्याकरणे इत्यत्र केन सप्तमी भवति।
12) अभिहिते अपादाने का विभक्तिः भवति।

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1) राजा विप्राय गां ददाति (अधोरेखाङ्कितस्य पदस्य सकारणं विभक्तिनिर्णयं कुरुत)
2) "नीवह्योर्न" इति वार्त्तिकं व्याख्यात।
3) षष्ठ्यतसर्थप्रत्ययेन इति सूत्रं व्याख्यात।
4) भीत्रार्थानां भयहेतुःइति सूत्रं व्याख्यात।
5) अकथितं च इति सूत्रस्य यथेच्छं त्रीणि उदाहरणानि विश्लेषयत
6) अपिः पदार्थसम्भावना... इत्यादिसूत्रे पदार्थ इत्यस्य तात्पर्यं लिखत।
7) आधारभेदान् निरूपयत।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) हैतौ इति सूत्रं व्याख्यात।

2) कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रस्याशयं लिखन्तु।

3) शेषे षष्ठी इति सूत्रस्य यथाग्रन्थं विस्तरेण व्याख्या कार्या।

4) येनाङ्गविकारः इति सूत्रस्य व्याख्या विधेया।

5) लिङ्गमात्राधिक्ये प्रथमां वर्णयत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः इति सूत्रं विस्तरेण व्याख्यात।

2) न लोकाव्यय.... इत्यादिसूत्रं पूरयित्वा विस्तरेण व्याख्यात।

***

RKMVERI/DSP/MAIS/16-21/D2019/SK-215

# SK-215 सिद्धान्तकौमुद्याम् एकशेषात् समासाश्रयं यावत् स्त्रीप्रत्ययश्च

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथेष्टं दशानां प्रश्नानाम् एकेन वाक्येन उत्तरं लिखत। 1x10=10**

1) भस्त्रफला इत्यत्र ह्रस्वं केन?

2) द्विपदी इत्यत्र सूत्रेण पादस्य पदादेशः केन?

3) वृषलस्य पत्नी इति व्यस्ते नत्वं कथम्?

4) वृषाकपीशब्दस्य अर्थं लिखत।

5) जातेः इत्यनुवृत्तावपि इतो मनुष्यजातेः इत्यत्र जातिग्रहणं किमर्थम्?

6) युनस्तिः इत्यत्र तद्धिताधिकारः किमर्थः?

7) वृद्धो यूना इति सूत्रे यूना इति किम्?

8) वृत्तिः नाम किम्?

9) विष्णुपुरम् इत्यत्र क्लीवत्वं कथम्?

10) पदष्ठीवम् इत्यत्र पद्भावः कथम्?

11) अलुगुत्तरपदे इत्यत्र अलुगधिकारः कियान्?

12) आत्मनेपदम् इत्यत्र अलुक् केन?

B) **यथेष्टं पञ्चानाम् उत्तरं लिखत। 3x5=15**

1) मनोः स्त्रीत्वे कति रूपाणि भवन्ति?

2) पुंयोगादाख्यायाम् इति सूत्रं व्याख्यात।

3) दामहायनानाच्च इति सूत्रं व्याख्यात।

4) बहुव्रीहेश्चान्तोदात्तात् इति सूत्रं व्याख्यात।

5) हलदन्तात्सप्तम्याः संज्ञायाम् इति सूत्रं व्याख्यात।

6) तत्पुरुषे कृति बहुलम् इति सूत्रं व्याख्यात।

7) द्वन्द्वाच्चुदषहान्तात्समाहारे इति सूत्रं व्याख्यात।

C) **यथेष्टं त्रयाणामुत्तरं लिखत।** **5x3=15**

1) वक्ष्यमाणा इत्यत्र ङीप् कथं न?

2) अजाद्यतष्टाप् इति सूत्रं व्याख्यात।

3) वोतो गुणवचनात् इति सूत्रं व्याख्यात।

4) वृद्धो यूना तल्लक्षणश्चेदेव विशेषः इति सूत्रं व्याख्यात।

5) ऋक्पूरब्धूःपथामानक्षे इति सूत्रं व्याख्यात।

D) **एकस्योत्तरं लिखत।** **10x1=10**

1) भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि इति सूत्रं व्याख्यात।

2) सर्वसमासशेषप्रकरणस्य सारं लिखत।

***

# SK-215 वैयाकरणसिद्धान्तकौमुद्यामेकशेषात्सर्वसमासाश्रयं यावत्, स्त्रीप्रत्ययश्च

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) सुचतुरः इत्यत्र कः समासः?
2) तत्पुरुषसमासस्य लक्षणं किम्?
3) वृषाकपिः कः?
4) सुत्वानम् अतिक्रान्ता इत्यर्थे किं रूपं भवति?
5) पाण्डुभूमः इत्यत्र कः समामान्तप्रत्ययः?
6) विचतुरः इत्यत्र कः समासः?
7) सप्तगोदावरम् इत्यत्र कः समासान्तप्रत्ययः?
8) आत्मनश्च इति सूत्रस्य किमुदाहरणम्?
9) आवट्या इत्यत्र कः स्त्रीप्रत्ययः?
10) त्रिविधलिङ्गानां शास्त्रीयं लक्षणं किम्?
11) निःस्विकाः इत्यस्य विग्रहः कः?
12) उरुद्वयसी इत्यत्र कः स्त्रीप्रत्ययः?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) सौपर्णेयी इति प्रयोगस्य सिद्धिप्रक्रियां लिखन्तु।
2) वाचोयुक्तिः इति प्रयोगस्य सिद्धिप्रक्रियां लिखन्तु।
3) अपथम् इति प्रयोगस्य सिद्धिप्रक्रियां लिखन्तु।
4) ग्रामेवासः इति प्रयोगस्य सिद्धिप्रक्रियां लिखन्तु।
5) उदमेघः इति प्रयोगस्य सिद्धिप्रक्रियां लिखन्तु।
6) हस्तेबन्धः इति सिद्धिप्रक्रियां लिखत।
7) शर्वरी इति प्रयोगस्य सिद्धिप्रक्रियां लिखन्तु।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) क्रीतात्करणपूर्वात् इति सूत्रस्य यथाग्रन्थं तात्पर्यं प्रकाशयन्तु।

2) वृद्धो यूना तल्लक्षणश्चेदेव विशेषः इति सूत्रस्य व्याख्या कार्या।

3) पुमान् स्त्रिया इति सूत्रस्य व्याख्या कार्या।

4) भातृपुत्रौ स्वसृदुहितृभ्याम् इत्यस्याशयं प्रकाशयत।

5) पुंयोगादाख्यायाम् इति सूत्रस्य व्याख्या कार्या।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) प्रत्ययस्थात्कात्पूर्वस्यातः इदाप्यसुपः इति सूत्रस्य व्याख्यां प्रतिपादयन्तु।

2) घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः इति सूत्रं व्याख्यात।

***

# SK-227 सिद्धान्तकौमुद्यां पूर्वकृदन्तप्रकरणम्

समयावधिः-होराद्वयम् पूर्णाङ्काः-५०

---

A) **दश समाधेयाः** **1x10= 10**

1) प्रैषातिसर्गप्राप्तकालेषु इति सूत्रे पुनः कृत्यविधिः किमर्थम्?
2) कुप्यम् इत्यस्य कोऽर्थः?
3) गोविन्दः इत्यत्र कः प्रत्ययः केन च शास्त्रेण?
4) ह्वावामश्च इत्यनेन कः प्रत्ययः विधीयते?
5) श्याद्व्यधास्रुसंस्रु...इत्यादिसूत्रे श्यैङः अवस्यतेश्च आदन्तत्वात् सिद्धे पृथग्ग्रहणं किमर्थम्?
6) शमि धातोः संज्ञायाम् इत्यत्र धातुग्रहणं किमर्थम्?
7) पूर्वसरः- इत्यत्र केन कः प्रत्ययः?
8) वातमजा मृगाः- इत्यत्र खश्प्रत्ययः केन?
9) नखम्पचा- इत्यत्र केन कः प्रत्ययः?
10) उष्णभोजी - इत्यत्र केन कः प्रत्ययः भवति?
11) कालिम्मन्या इत्यत्र केन ह्रस्वः?
12) राजयुध्वा इत्यस्य कोऽर्थः?

B) **यथाभीष्टं पञ्च प्रक्रियोल्लेखपुरस्सरं साधयत** **3 x 5 = 15**

1) कामप्रसभावरोधिनी
2) विचारदृक्
3) त्रिजगज्जयी
4) मनोभूः
5) निदेशकारी
6) वियोगभाक्
7) जवनाश्वयायी

C) **यथाभीष्टं त्रीणि समाधत्त** **5 x 3 = 15**

1) उदुपधाद्भावादिकर्मणोरन्यतरस्याम् इतीदं सूत्रं व्याख्यात।

2) णेर्विभाषा इति सूत्रं प्रतिपादयत।

3) क्वसुकानचोः विवरणं कुरुत।

4) खिति मुमागमं वर्णयत।

5) वुन्प्रत्ययविधानं वर्णयत।

D) **एकम् उत्तरयत** **10x1= 10**

1) निष्ठातस्य नकारविधानं प्रतिपादयत।

2) सत्प्रत्ययविधानं वर्णयत।

***

RKMVERI/DSP/MAIS/19-24/D2019/SK-236

## SK-236 लघुसिद्धान्तकौमुदी अजन्तपुंलिङ्गान्ता

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

A) **यथाकामं सप्तदशसु पञ्चदश समाधेयाः।** **1x15=15**

1) लघुसिद्धान्तकौमुद्याः मङ्गलाचरणं किम्?

2) अनुनासिकसंज्ञा कस्य भवति?

3) उपदेशपदस्य कः अर्थः?

4) अनुनासिकसंज्ञाविधायकं सूत्रं लिखत।

5) गुणसंज्ञाविधायकं सूत्रं किम्?

6) वृद्धिसंज्ञाविधायकं सूत्रं किम्?

7) अनेकाल्शित्सर्वस्य इति सूत्रस्यार्थं लिखत।

8) अज्वर्णस्य इत्संज्ञा केन सूत्रेण?

9) तुग्विधायकं सूत्रं किम्?

10) वाग्घरिः इत्यत्र कथं पूर्वसवर्णः?

11) ससजुषो रुः इति सूत्रस्य कोऽर्थः?

12) हशि च इति सूत्रेण किं विधीयते?

13) सम्बुद्धिसंज्ञाविधायकं सूत्रं किम्?

14) रामाभ्याम् इत्यत्र दीर्घः कथम्?

15) घिसंज्ञा केन सूत्रेण भवति?

16) सर्वनामस्थानसंज्ञाविधायकं सूत्रं लिखत।

17) गतिसंज्ञा केन सूत्रेण विधीयते?

B) **यथाकामं सप्तसु पञ्च समाधत्त।** **3x5=15**

1) वर्णानामुच्चारणस्थानानि लिखत।

2) एवर्णस्य कति भेदाः, तान् च तालिकया प्रदर्शयत।

3) आ आङ् इति निपातौ कस्मिन्नर्थे प्रयुज्येते?

4) झलां जशोऽन्ते इत्यस्य फलं विशिष्टतया कुत्र भाति?

5) उभशब्दस्य सर्वादिगणे पाठे किं फलम्?

6) रामैः इति रूपं साधयत।

7) सर्वस्मै इति रूपं साधयत।

C) **यथेच्छं त्रिषु द्वयं समाधत्त।** **5x2=10**

1) आदिरन्त्येन सहेता इति सूत्रं व्याख्यात।

2) सञ्छम्भुः इति रूपं साधयत।

3) कृत्तद्धितसमासाश्च इति सूत्रं व्याख्यात।

D) **यथेच्छमेकमुत्तरत।** **10x1=10**

1) न पदान्ताट्टोरनाम् इति सूत्रं व्याख्यात।

2) यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् इति सूत्रं व्याख्यात।

***

# SK-239 लघुसिद्धान्तकौमुद्यां कृत्तद्धितौ।

समयः - होराद्वयम् | पूर्णाङ्काः - ५०

---

A) **यथेच्छं दश प्रश्नाः समाधेयाः।** **1x10=10**

1) बहुलार्थः कः?

2) करणे यजः इति सूत्रस्यार्थः कः।

3) गोत्वमित्यस्य कोऽर्थः।

4) मथुरायामिव इत्यर्थे किं रूपम्।

5) इतः इत्यत्र कः प्रत्ययः।

6) षष्ठः इत्यत्र कः प्रत्ययः।

7) एकादशानां पूरणः इत्यर्थे किं रूपम्।

8) कारणा इत्यत्र कः कृदन्तप्रत्ययः?

9) कृत्प्रत्ययः कस्मिन्नर्थे विहितः।

10) षः प्रत्ययस्य इति सूत्रस्यार्थं लिखत।

11) लवित्रम् इत्यत्र कः प्रत्ययः।

12) वशंवदः इत्यत्र कः प्रत्ययः।

13) लृटः सद्वा इत्यत्र का विभाषा।

B) **यथाकामं पञ्च प्रश्नान् उत्तरत।** **3x5=15**

1) जनमेजयः इति रूपं साधयत।

2) आदित्यः इति रूपं साधयत।

3) कर्मण्यण् इति सूत्रं व्याख्यात।

4) ण्वुलतृचौ इति सूत्रं व्याख्यात।

5) शिखावान् दीपः इत्यत्र कथं न लच्प्रत्ययः।

6) तत्र जातः इति सूत्रं व्याख्यात।

7) वृद्धसंज्ञा।

C) **स्वच्छन्दं त्रीन् समाधत्त।** **5x3=15**

1) निष्ठासंज्ञा।

2) स्त्रियां क्तिन् इति सूत्रं व्याख्यात।

3) गोत्रापत्यम्।

4) कथं कुतः कस्माद्वा।

5) शरीरावयवाद्यत्।

D) **एकं प्रतिपादयत।** **10x1=10**

1) कृत्यप्रत्ययाः।

2) केशशब्दात् मत्वर्थीयप्रत्यये कति रूपाणि तानि च साधयत।

***

# SK-239 लघुसिद्धान्तकौमुद्यां कृत्तद्धितौ।

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) अधः यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1) कृत्-प्रत्ययाः कर्त्रर्थे भवन्तीत्यत्र प्रमाणं किम्।

2) बहुलार्थः कः।

3) यशस्करी इत्यत्र कः कृत्प्रत्ययः।

4) चूडालः इत्यत्र कः प्रत्ययः।

5) शप्यम् इत्यत्र केन सूत्रेण यत्।

6) राजयुध्वा इत्यत्र कः प्रत्ययः।

7) प्रथिमा इत्यस्य कोऽर्थः।

8) दन्तुरः इत्यत्र कः प्रत्ययः।

9) गेहे कः इति सूत्रस्यार्थं लिखत।

10) सरसिजम् इत्यत्र ङेरलुक् केन सूत्रेण।

11) कथम् इत्यस्य विग्रहः कः।

12) विंश इत्यत्र तिशब्दस्य लोपः कथम्।

**B) यथारुचि अत्र पञ्च समाधत्त। 3x5=15**

1) ज्ञः इति रूपं साधयत।

2) जीनः इति रूपं साधयत ।

3) ऋहलोर्ण्यत् इति सूत्रं व्याख्यात।

4) श्रेष्ठः इति रूपं साधयत।

5) रसवान् इति रूपं साधयत।

6) ग्रामीणः इति रूपं साधयत।

7) आत्मनीनम् इति रूपं व्याख्यात।

C) **निम्नलिखितेषु यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) तुमुन्ण्वुलौ.....इति सूत्रं पूरयित्वा व्याख्यात।
2) लोमादिपामादिपिच्छादिभ्यः शनेलचः इति सूत्रं व्याख्यात ।
3) विकारार्थकान् प्रत्ययान् विवृणुत।
4) अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा इति सूत्रं व्याख्यात।
5) विद्वान् इति रूपं साधयत ।

D) **अधःप्रदत्तेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) शतृशानच् -विधायकानि सूत्राणि व्याख्यात ।
2) चातुरार्थिकान् प्रत्ययान् विवृणुत।

***

RKMVERI/DSP/MAIS/17-21/D2019/SK-239

# SK-239 लघुसिद्धान्तकौमुद्यां कृत्तद्धितौ

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत।** **1x10=10**

1) नावा तार्यम् इत्यस्मिन् विग्रहे केन प्रत्ययेन किं रूपम्?

2) उदुम्बराः सन्त्यस्मिन् देशे इत्यस्मिन् विग्रहे कः प्रत्ययः किं रूपम्?

3) प्रत्ययोत्तरपदयोश्च इति सूत्रस्य वृत्तिं लिखत।

4) प्रासङ्ग्यः इत्यत्र केन सूत्रेण किं प्रत्ययः?

5) पृथिव्याः ईश्वरः इत्यस्मिन् विग्रहे किं रूपम्?

6) इष्टस्य यिट् च इति सूत्रस्य वृत्तिं लिखत।

7) यञिञोश्च इति सूत्रस्य वृत्तिं लिखत।

8) गोत्रसंज्ञाविधायकं सूत्रं लिखत।

9) च्छ्वोः शूडनुनासिके च इति सूत्रस्य वृत्तिं लिखत।

10) पण्डितम् आत्मानं मन्यते इत्यस्मिन् विग्रहे रूपद्वयं लिखत।

11) समर्थानां प्रथमाद्वा इति सूत्रस्य अधिकारः कियद्दूरपर्यन्तम् वर्तते?

12) गोरपत्यादि इत्यस्मिन्नर्थे केन सूत्रेण किं रूपम्?

B) **अधो लिखितेषु यथारुचि पञ्च समाधत्त।** **3x5=15**

1) पाशुपतम् इति रूपं साधयत।

2) आह्निकम् इति रूपं साधयत।

3) भूयिष्ठः इति रूपं साधयत।

4) आत्मनीनम् इति रूपं साधयत।

5) मामकीनः इति रूपं साधयत।

6) यौवनम् इति रूपं साधयत।

7) षाण्मातुरः इति रूपं साधयत।

C) **अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) काल-समय-वेलासु तुमुन् इति सूत्रं व्याख्यात।

2) तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम् इति सूत्रं व्याख्यात।

3) वृद्धसंज्ञां निरूपयत।

4) युवसंज्ञायाः व्याख्यानं कुरुत।

5) समर्थानां प्रथमाद्वा इति सूत्रं व्याख्यात।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) कृत्यप्रत्ययान् वर्णयत।

2) वासरूपोऽस्त्रियाम् इति सूत्रं व्याख्यात।

***

# SK-241 महाभाष्ये 2-4 आह्निकानि

समयावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) आदित्यवत्स्युः इत्यस्य किं तात्पर्यम् ?

2) भाष्यमते ऌकारोपदेशस्य किं प्रयोजनम् ?

3) सन्ध्यक्षरेषु तपरोपदेशश्चेत् के दोषाः ?

4) रेफस्य परोपदेशे के दोषाः ?

5) अयोगवाहानामविशेषेणोपदेशस्य सिद्धान्ते किं प्रयोजनम् ?

6) किमर्थं वर्णानामुपदेशः ?

7) तद्भावितपदस्य कोऽर्थः ?

8) कयोर्विशेष्यविशेषणभावः ?

9) प्रत्येकं वाक्यपरिसमाप्तिरित्यस्य उदाहरणं किम् ?

10) तच्छेषः इति कस्य सूत्रस्य शेषः ?

11) कयोः विप्रतिषेधः अयुक्तः ?

12) न सिच्यन्तरङ्गमस्तीत्यत्र ज्ञापकं किम् ?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अकारस्य विवृतोपदेशः आकारग्रहणार्थः इति वार्तिकं व्याख्यात।

2) एकवर्णवच्च इति वार्तिकं व्याख्यात।

3) उरण्रपरः इति सूत्रे पूर्वेण णकारेण प्रत्याहारः इति कथं ज्ञायते।

4) वृद्धिरादैच् इत्यत्र कुत्वं कुतो न।

5) वृद्धिसंज्ञायाः इतरेतराश्रयतां निवारयत।

6) नियमादिको गुणवृद्धी भवतः विप्रतिषेधेन।

7) वृद्धिग्रहणमुत्तरार्थम् इति वार्तिकं व्याख्यात।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) वर्णानाम् अर्थवत्त्वं यथाभाष्यं प्रतिपादयत।

2) प्रत्याहारेषु इत्संज्ञकवर्णानां ग्रहणाभावे भाष्यकारमतानि विवृणुत।

3) अन्तःस्थवर्णानाम् अण्-सु उपदेशप्रयोजनं प्रतिपादयत।

4) वृद्धिरादैच् इति सूत्रे आकारस्य तपरकरणं खण्डयत।

5) इको गुणवृद्धी इत्यत्र तदपवादपक्षः।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) वर्णसमाम्नाये जातिग्रहणपक्षं निरूपयत।

2) इको गुणवृद्धी इत्यत्र तच्छेषतदपवादपक्षौ निरूपयत।

***

## SK-242 महाभाष्ये पञ्चमषष्ठसप्तमाह्निकानि

समयावधिः-होराद्वयम् | पूर्णाङ्काः-५०

A) **दश समाधेयाः** **1x10 = 10**

1) आत्वं कित्त्वस्यानिमित्तं कुत्र?

2) विध्यनित्येत्त्वमनुपपन्नं कथम्?

3) षट्संज्ञायामुपदेशवचनं कर्तव्यं न वा?

4) उपस्थिते हि दोषः स्यात्- उपस्थिते इत्यस्य कोऽर्थः?

5) उक्तं वा इत्यस्य किमुदाहरणम्?

6) सम्प्रसारणसंज्ञा वाक्यस्य चेत् कः दोषः?

7) टकितोराद्यन्तविधाने प्रत्ययप्रतिषेधः न कर्तव्यः तत्र किं प्रमाणम्?

8) भवच्छब्दस्य सर्वनामत्वे किं प्रयोजनम्?

9) पूर्वपक्षिमते घुसंज्ञायां प्रकृतिग्रहणं किमर्थं कर्तव्यम्?

10) दाप्प्रतिषेधे दैपि किमर्थं न प्रवर्तते?

11) दा धा  इत्यनयोः समानशब्दानां घुसंज्ञा कथं न भवति?

12) उरण्-रपर-वचनमन्यनिवृत्यर्थमिति चेत् कुत्र दोषः?

B) **यथाभीष्टं पञ्च समाधत्त** **3 x 5 = 15**

1) शुक्ल्यास्तां वस्त्रे इत्यत्र दोषम् उद्भाव्य समाधत्त।

2) ऊञ ऊँ इति व्याख्यात।

3) कृन्मेजन्तः इति सूत्रं व्याख्यात।

4) अव्ययीभावश्च इति सूत्रम् अपेक्षितम् उत न?

5) सिद्धं तु षष्ठ्यधिकारे वचनात् इति व्याख्यात।

6) एकाचो द्वे प्रथमार्थम् इति व्याख्यात।

7) षट्संज्ञायाम् उपदेशग्रहणं कर्तव्यम् उत न?

C) **यथाभीष्टम् त्रीणि समाधत्त** **5 x 3 = 15**

1) सङ्ख्यासंज्ञासूत्रे सङ्ख्याग्रहणम् अपेक्षितम्?

2) अनागमकानां सागमका आदेशाः इति व्याख्यात।

3) भवच्छब्दस्य सर्वनामसंज्ञायाः प्रयोजनं व्याख्यात।

4) शे इति सूत्रं भाष्यदिशा व्याख्यात।

D) **एकम् उत्तरयत** **10x1= 10**

1) अदसो मात् इति सूत्रं भाष्यदिशा व्याख्यात।

2) दाधाघ्वदाप् इत्यत्र प्रकृतिग्रहणं कर्तव्यम् उत न?

***

## SK-255 परिभाषेन्दुशेखरे 1 तः 50 परिभाषां यावद्भागः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथेष्टं दश प्रश्नान् उत्तरत।** **1x10=10**

1) परिभाषेन्दुशेखरस्य विग्रहं पक्षद्वये लिखत ।

2) तत्रोपलम्भादन्यत्रानुपलम्भाच्च इत्यनेन का परिभाषा साध्यते ?

3) आकडाराधिकारस्थभपदसञ्ज्ञादिविषये कः पक्षः सिद्धान्तितः ?

4) नानुबन्धकृतमनेजन्तत्वम् इत्यस्य ज्ञापकं किम् ?

5) यदागमपरिभाषाया अनित्यत्वं कथम् ?

6) न भूसुधियोः इति निषेधेन किं ज्ञायते ?

7) ज्यादादीयसः इति दीर्घोच्चारणेन का परिभाषा ज्ञाप्यते ?

8) हृदयस्य हृल्लेख इत्यत्र लेखग्रहणात् का परिभाषा ज्ञाप्यते ?

9) यस्मिन्विधिस्तदादावलग्रहणे इति परिभाषा कस्य अपवादभूता ?

10) विकरणेभ्योः नियमो बलीयान् इत्यस्य ज्ञापकं लिखत ?

11) गौण इत्यस्य कः अर्थः ?

12) अन्तरङ्गपरिभाषायाम् अर्थनिमित्तस्य बहिरङ्गत्वं स्वीक्रियते न वा ?

B) **यथाकामं पञ्च प्रश्नान् उत्तरत।** **3x5=15**

1) कार्यकालपक्षे अयादिभ्यः परैव प्रगृह्यसञ्ज्ञा इत्यस्य आशयं यथाग्रन्थं प्रतिपादयत।

2) क्वचिदेकदेशो अपि अनुवर्तत इति परिभाषायाः अवतरणं विलिख्य व्याख्यात।

3) नानुबन्धकृतमसारूप्यम् इति परिभाषां निरूपयत।

4) दीधीवेवीटाम् इति सूत्रस्थभाष्यस्य एकदेश्युक्तित्वं साधयत।

5) स्वं रूपमिति स्वशब्देन कथम् अर्थवद्ग्रहणपरिभाषा साधिता ?

6) अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन इति परिभाषां सोदाहरणं व्याख्यात ।

7) एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः इति परिभाषां निरूपयत।

C) **यथाकामं त्रीन् प्रश्नान् उत्तरत।** **5x3=15**

1) उभयगतिरिह भवति इति परिभाषां व्याख्यात।

2) कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते परिभाषां व्याख्यात।

3) यदागमपरिभाषा स्थानिवत् सूत्रेण गतार्था उत नेति यथाग्रन्थं निरूपयत ?।

4) कार्यकालं सञ्ज्ञापरिभाषमिति यथाग्रन्थं निरूपयत ।

5) वर्णाश्रये नास्ति प्रत्ययलक्षणमिति परिभाषां व्याख्यात।

D) **यथाकाममेकमुत्तरत।** **10x1=10**

1) कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् इति व्याख्यायत ।

2) प्रत्ययग्रहणे यस्माद् इति परिभाषां व्याख्यात ।

***

## SK-265 लघुशब्देन्दुशेखरे न पदान्तयावद्भागः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथेष्टं दश प्रश्नान् उत्तरत। 1x10=10**

1) स्वौजसमौड् इत्यादीनां षड्विधसूत्रेषु क्वान्तर्भावः ?

2) सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकमिति क्व सूत्रभाष्ये उक्तम् ?

3) कं नत्वा नागेशः ग्रन्थं करोति ?

4) भाष्योक्ततृतीयहेतुः कः ?

5) नागेशमते लक्षणैकचक्षुष्कविषये का परिभाषा प्रवर्तते ?

6) दीक्षितमते उपदेशशब्दार्थः कः ?

7) अचि श्नुधातुभ्रुवामित्यत्र इण इत्येव सिद्धे य्वोरिति निर्देशात् किं ज्ञाप्यते ?

8) ऊकाल इत्यत्र कालग्रहणेन किं लक्ष्यते ?

9) यावदास्यभवतुल्यत्वग्रहणस्य मानं किम् ?

10) विधौ परिभाषोपतिष्ठते नानुवादे इत्यस्य मूलं किम् ?

11) मिदचोऽन्त्यादिति प्रत्ययपरत्वयोरप्यपवादः इत्यत्र मानं किम् ?

12) प्रसङ्गश्च सति सम्भवे अर्थवत एव। कुतः ?

B) **यथाकामं पञ्च प्रश्नान् उत्तरत। 3x5=15**

1) उपजीव्यविरोधात् सन्धिर्न इति मतं दूषयत।

2) पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गा इत्यस्याशयं लिखत।

3) सहेतृशब्दाश्रयणेन कुतो नान्योन्याश्रयपरिहारः ?

4) हलन्त्यम्सूत्रे भावघञन्तानुवृत्तौ कः दोषः ?

5) यावदास्यभवतुल्यत्वेऽपि प्रयत्नग्रहणं किमर्थम् ?

6) कथं इक्पदोपस्थापनेन चरितार्थानामपि गुणादिशब्दानां वाक्यार्थान्वयिता ?

7) यत्रानेकविधमान्तर्यमिति परिभाषा कथं सिद्धा ?

C) **यथाकामं त्रीन् प्रश्नान् उत्तरत।** **5x3=15**

1) ऊकाल इति सूत्रं व्याख्यात।

2) भूवादयो इति सूत्रं व्याख्यात।

3) अनेकान्ताः अनुबन्धा इति पक्षं निरूपयत ।

4) प्रादय इति सूत्रं व्याख्यात ।

5) मिदचोन्त्यात्परः इति सूत्रं व्याख्यात ।

D) **यथाकाममेकमुत्तरत।** **10x1=10**

1) पूर्वत्रासिद्धमिति सूत्रं व्याख्यात।

2) इको गुणवृद्धी सूत्रं यथाग्रन्थं निरूपयत।

***

# SK-267 लघुशब्देन्दुशेखरे कारकप्रकरणम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) करणतृतीयायाः कोऽर्थः?

2) भीत्रार्थानां भयहेतुः इति कस्यापवादः?

3) सर्वकर्मविहितद्वितीयादीनां कोऽर्थः?

4) दुहेरर्थः कः?

5) हेतुश्च कः?

6) एकतिङ् वाक्यम् इत्यस्य कोऽर्थः?

7) सम्प्रदानचतुर्थीविभक्तेः कोऽर्थः?

8) नागेशभट्टानुसारं प्रातिपदिकार्थः कः?

9) भट्टोजिदीक्षितमते प्रातिपदिकार्थः कः?

10) तथायुक्तत्वं किम्?

11) ईप्सिततमत्वं किम्?

12) अनभिहिते इति सूत्रम् आवश्यकम् अनावश्यकं वा?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) परस्परस्मात् मेषौ अपसरतः इति वाक्यस्य साधुत्वं प्रतिपादयत।

2) गां दोग्धि पयः इति वाक्यस्य प्रक्रियां यथाग्रन्थं लिखन्तु।

3) कैयटानुसारं परिमाणग्रहणस्य सार्थक्यं प्रतिपादयन्तु।

4) गतिबुद्धि......इति सूत्रे अकर्मकपदेन केषां ग्रहणमिति प्रतिपादयत।

5) हृक्रोरन्यतरस्याम् इति सूत्रस्य व्याख्यां प्रतिपादयन्तु।

6) मन्यकर्मण्यनादरे इति सूत्रस्य यथाग्रन्थं व्याख्या विधेया।

7) गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका इत्यस्याशयं लिखत।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि इत्यस्याशयं लिखत।

2) सहयुक्तेऽप्रधाने इति सूत्रस्य व्याख्यां लिखन्तु।

3) यतश्च निर्धारणमिति सूत्रस्य व्याख्या विधेया।

4) तथायुक्तं चानीप्सितमिति सूत्रस्य व्याख्या कार्या।

5) कर्मणा यमभिप्रैति स सम्प्रदानमिति सूत्रस्य व्याख्या कार्या।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) आधारोऽधिकरणम् इति सूत्रस्यार्थं प्रतिपाद्य, अधिकरणभेदान् वर्णयत।

2) अनभिहिते इति सूत्रस्य सार्थकता निरर्थकता वेति यथाग्रन्थं विवेचयत।

***

## SK-273 वैय्याकरणभूषणसारः (समासशक्तिप्रकरणात् स्फोटप्रकरणं यावत्)

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) प्राचीनमते तत्पुरुषस्य किं लक्षणम् ?

2) समासे संसर्गस्य वाच्यत्वे राजपुरुषपदेन कीदृशो बोधः?

3) उद्धृतौदना इत्यस्य शाब्दबोधः कः ?

4) बोधजनकत्वं शक्तिरिति कस्य मतम्?

5) कतिविधो नञ् ?

6) कौण्डभट्टमते निवृत्तम् इत्यत्र क्तप्रत्ययः कस्मिन् अर्थे ?

7) प्रादयो द्योतकाश्चादयश्च वाचका इति केषां मतम् ?

8) निपातानां वाचकत्वे सकर्मकत्वलक्षणं किम् ?

9) त्वादिप्रत्ययानां मीमांसकमते कः दोषः ?

10) तुमुनादीनां भावोऽर्थः इत्यत्र किं मानम् ?

11) अभेदैकत्वसंख्या का ?

12) कथं पदस्फोटः सिद्धः ?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1. समासस्तु चतुर्थेति कुतः प्रायोवादः ?
2. बहूनां वृत्तिधर्माणां वचनैरेव साधने स्यान्महद्गौरवम्। विशदयत।
3. असाधुभ्यः साधुस्मरणद्वारा शाब्दबोधः कुतः न युक्तः ?
4. आरोपितत्वं नञर्थः इति प्रतिपादयत।
5. अभावस्य प्रतियोगिनि विशेष्यत्वस्वीकारे अत्वं भवसीत्यत्र कथं व्यवस्था ?
6. निपातलक्षणविषये वैय्याकरणानां किं मतम् ?
7. व्यवस्थितेर्व्यवहितेरिति कारिकायां व्यवस्थितेः इत्यस्य किं तात्पर्यम् ?

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) वृत्तिभेदान् ग्रन्थदिशा वर्णयत।

2) वैय्याकरणनये साधुत्वं किमिति ग्रन्थदिशा विचारयत।

3) नञर्थाभावविशेष्यकपक्षं वर्णयत।

4) निपातानां वाचकत्वमन्वयव्यतिरेकयोः इति कारिकां व्याख्यात।

5) वर्णस्फोटं विचारयत।

**a) द्वयोरेकं समाधत्त।** **10x1=10**

6) निपातानां द्योतकत्वपक्षं वर्णयत।

7) भूषणसारदिशा समासभेदान्निरूप्य प्राचीनलक्षणं खण्डयत।

***

# SK-281 वाक्यपदीयम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

D) **द्वादशसु दश समाधत्त।** **1x10=10**

a) अर्थभावेन कः विवर्तते ?

b) अत्रातीतविपर्यासः केवलामनुपश्यति। कुत्र ?

c) प्रयोजनस्य भेदद्वयं किम् ?

d) उपादानशब्दस्य कति भेदाः ?

e) तेजसः द्वे शक्ती के ?

f) षष्ठ्याः प्रथमायाश्च निमित्तत्वाय किं कल्पते ?

g) विषयस्य संस्कारः इत्यस्योदाहरणं किम् ?

h) वैय्याकरणानां नये शब्दः कस्य परिणमः ?

i) प्राणः कदा वर्णेषूपलीयते ?

j) ज्ञानं कथं भासते ?

k) कः अपभ्रंशः ?

l) केषां साधुरवाचकाः ?

A) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अध्याहिकलां यस्य कालशक्तिमुपाश्रिताः।
जन्मादयो विकाराः षड् भावभेदस्य योनयः।।

2) नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः।।

3) निर्ज्ञातशक्तेर्द्रव्यस्य तां तामर्थक्रियां प्रति।
विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते।।

4) यथैकबुद्धिविषया मूर्तिराक्रियते पटे।
मूर्त्यन्तरस्य त्रितयमेवं शब्देपि दृश्यते।।

5) न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

6) संज्ञिनीं व्यक्तिमिच्छन्ति सूत्रे ग्राह्यामथापरे।
जातिप्रत्यायिता व्यक्तिः प्रदेशेषूपतिष्ठते।।

7) पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः।।

B) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) शब्दार्थयोः भेदद्वयम्।

2) अभ्यासादृष्टयोः प्रामाण्यम्।

3) ध्वनिना शब्दावधारणक्रमः सोदाहरणं निरूपयत।

4) शब्दस्य सर्वमूलत्वम्।

5) अपभ्रंशे साधुस्मरणमूलकेनैव बोधः इति पक्षः।

C) **द्वयोरेकं समाधत्त।** **10x1=10**

1) शब्दस्य जगन्मूलत्वम्।

2) शब्दस्य ग्राह्यत्वं ग्राहकत्वम्।

***

# SK-311 अर्थसङ्ग्रहः

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) शाब्दीभावनायाम् इतिकर्तव्यतया कस्य अन्वयः?

2) जैमिनिप्रोक्तं धर्मलक्षणं किम्?

3) को नाम मन्त्रः?

4) महाप्रकरणं नाम किम् ?

5) उत्पत्तिविधेः लक्षणं किम्?

6) यागस्य कति रूपाणि? कानि च तानि?

7) किं नाम अङ्गत्वम्?

8) प्रयोगविधौ स्थानप्रमाणस्य लक्षणं किम्?

9) अर्थक्रमः कः?

10) नियमविध्युदाहरणं किम् ?

11) आरादुपकारकमित्यस्य अर्थः कः?

12) भूतार्थवादः कः?

A) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) धर्मलक्षणविचारः।

2) अधिकारविधिः।

3) मन्त्रलक्षणम्।

4) नियमविधिः।

5) प्रयोगविधौ अर्थप्रमाणम्।

6) सन्निपत्योपकारकम्।

7) सन्दंशलक्षणविचारः।

B) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) शाब्दीभावनायाः परिचयः।

2) "सोमेन यजेत" इत्यत्र विशिष्टविधिविचारः।

3) प्रयोगविधौ पाठक्रमलक्षणम्।

4) विनियोगविधौ स्थानप्रमाणम्।

5) अर्थवादः तद्भेदश्च।

C) **द्वयोरेकं समाधत्त।** **10x1=10**

1) प्रयोगविधेः लक्षणं निरूप्य सहकारिभूतं मुख्यक्रम-प्रवृत्तिक्रमलक्षणं ग्रन्थोक्तदिशा वर्णयत।

2) उत्पत्त्यादिविधिभेदान् सोदाहरणं वर्णयत।

***

**SK-311 अर्थसङ्ग्रहः**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

D) **यथाकामं दशप्रश्नाः समाधेयाः** **1x10=10**

1) 'सोमेन यजेत' इत्यत्र कीदृशी लक्षणा स्वीक्रियते ?
2) विकृतिः कः?
3) अधिकारविधिः कः?
4) अध्ययनविधिः कः?
5) वेदः कः?
6) क्रमः कः?
7) वेदवाक्यं कतिधा विभज्यते?
8) अर्थवादः कः?
9) स्थानक्रमस्य उदाहरणं किम्?
10) किं खलु धर्मजिज्ञासासूत्रम्?
11) उत्पत्तिविधौ करणं किम्?
12) विधेः चतुर्विध्यं नामत उल्लिख्यताम् ?

E) **यथारुचि अधोलिखितेषु पञ्चानामुत्तरं लिखत।** **3x5=15**

1) नियमविधिस्वरूपं निर्णीयताम्।
2) महाप्रकरणस्वरूपं वर्णयत।
3) पाठप्रमाणं कतिविधं कीदृशञ्च?
4) अर्थवादस्य कीदृशाः भेदाः?
5) अङ्गत्वं नाम किम्?
6) दध्ना जुहोतीत्यत्र विधित्वं कथं ज्ञातम्?
7) 'अथातो धर्मजिज्ञासा' इति सूत्रे जिज्ञासापदस्य कोऽर्थः?

F) **अधस्ताद् यथारुचि प्रश्नत्रयं समाधत्त।** **5x3=15**

1) मन्त्रः

2) पर्युदासः

3) संन्दशः

4) धर्मः

5) मत्वर्थलक्षणा

G) **अत्र अनुप्रियमेकमनुबध्नीत।** **10x1=10**

1) विनियोगविधेः स्वरूपमालोच्य श्रुतिलिङ्गप्रमाणयोर्बलविचारो विधीयताम् ।

2) नामधेयनिमित्तचतुष्टयं सयुक्तिकं प्रतिपाद्यताम्।

***

# SK-341 तर्कसङ्ग्रहो न्यायबोधिनीसहितः

समयावधिः- होराद्वयम् पूर्णाङ्काः-50

A) **दश समाधेयाः** **1 x 10 = 10**

1) न्यायबोधिन्याः मङ्गलश्लोकं लिखत।
2) न्यायबोधिन्यनुसारेण पृथिव्याः निष्कृष्टं लक्षणं किम्?
3) प्राणः कः?
4) कानि मूर्तानि?
5) काललक्षणे अतीतादि इति किमर्थम्?
6) का उदीची?
7) मानं कतिविधम्?
8) न्यायबोधिन्यनुसारं शब्दस्य भेदान् लिखत।
9) असाधारणकारणस्य लक्षणं किम्?
10) बाह्यप्रत्यक्षे कः व्यापारः?
11) पक्षधर्मता का?
12) स्मृतिः कतिविधा?

B) **यथाभीष्टं पञ्च समाधत्त** **3 x 5 = 15**

1) तर्कसङ्ग्रस्य मङ्गलश्लोकस्य शाब्दबोधं लिखत।
2) असम्भवं विवृणुत।
3) तर्कसङ्ग्रहानुसारम् असमवायिकारणस्य लक्षणं प्रतिपादयत।
4) द्रवत्वं विचारयत।
5) केवलान्वयिहेतुं विचारयत।
6) साधारणसव्यभिचारं वर्णयत।
7) स्वरूपासिद्धं वर्णयत।

C) **यथाभीष्टं त्रयाणाम् उत्तरं देयम्** **5 x 3 = 15**

1) रूपलक्षणं परिष्कृत्य लिखत।

2) द्रवत्वलक्षणं परिष्कृत्य लिखत।

3) अयथार्थानुभवलक्षणं परिष्कृत्य लिखत।

4) परामर्शं विस्तारयत।

5) असिद्धं विस्तारयत।

D) **यथाभीष्टम् एकां परिभाषां व्याख्यात** **10x1 = 10**

1) शक्तेः अष्टमपदार्थतां निरासयत।

2) लक्षणां यथाधीतं निरूपयत।

***

# SK-344 न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डः, महाभाष्यपस्पशाह्निकं च

कालावधिः - होराद्वयम् | सत्रम् - 5 | पूर्णाङ्काः - 50

---

A) **नवसु अष्टौ समाधत्त।( मुक्तावली)** **1x8=8**

1) काले कति गुणाः?
2) विघ्नध्वंसस्तु मङ्गलस्य द्वारम् इति के प्राहुः?
3) त्वचो लक्षणं किम्?
4) भ्रमणरेचनादीनां कुत्रान्तर्भावः?
5) स्वेदजाः के?
6) समवायसम्बन्धस्वीकारे किं प्रमाणम्?
7) वलयीकृतवासुकिः अस्य विग्रहः कः?
8) दाहं प्रति कारणं किम्, प्रतिबन्धकं च किम्?
9) कारिकावल्याः प्रणेता कः?

B) **त्रिषु द्वयं समाधत्त। (महाभाष्यम्)** **1x2=2**

1) महाभाष्यकर्ता कः?
2) अथ शब्दानुसाशनम् इत्यत्र अथपादर्थः कः?
3) सिद्धे शब्दार्थसम्बन्धे इत्यत्र सिद्धपदार्थः कः?

C) **षट्सु चतुरः समाधत्त। ( मुक्तावली)** **3x4=12**

1) कालस्य लक्षणं प्रतिपादयन्तु।
2) सभेदं कर्मलक्षणं प्रतिपादयन्तु।
3) मुक्तावलीप्रथमद्वितीयमङ्गलश्लोकौ विलिख्य तयोः व्याख्या कार्या।
4) सादृश्यस्य पदार्थत्वं व्युत्पाद्य यथाग्रन्थं खण्डयन्तु।
5) समवायिकारणलक्षणं प्रतिपादयन्तु।
6) अभावानामधिकरणात्मकत्वं कुतो नेति यथाग्रन्थं प्रतिपादयन्तु।

D) **द्वयोरेकं समाधत्त। ( महाभाष्यम्)** **3x1=3**

1) यो वा इमाम् इति गौणप्रयोजनस्याशयं लिखन्तु।

2) लघुः, असन्देहः इति मुख्यप्रयोजनयोः तात्पर्यं लिखन्तु।

E) **त्रिषु द्वयं समाधत्त। (मुक्तावली)** **5x2=10**

1) तमसो द्रव्यत्वं व्युत्पाद्य  यथाग्रन्थं खण्डयन्तु।

2) इन्द्रियं घ्राणलक्षणम् इति ग्रन्थस्याशयं वर्णयत।

3) नानारूपवती मता इत्यस्य तात्पर्यं प्रकटयन्तु।

F) **द्वयोरेकं समाधत्त। (महाभाष्यम्)** **5x1=5**

1) सुदेवो असि इति गौणप्रयोजनस्य तात्पर्यं प्रकाशयत।

2) दशम्यां पुत्रस्य, यदधीतम् इति गौणप्रयोजनयोराशयं वर्णयत।

G) **द्वयोरेकं समाधत्त। (मुक्तावली)** **10x1=10**

1) सभेदं जलस्य स्वरूपं वर्णयन्तु।

2) मङ्गलवादं यथाग्रन्थं प्रतिपादयन्तु।

***

## SK-370 व्युत्पत्तिवादे प्रथमाकारके अभेदान्वयभागः

कालावधिः - होराद्वयम् सत्रम् - 9 पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) स्तोकम् ओदनस्य पाकः इति प्रयोगः कदा भवति?
2) मृदु पचति इत्यत्राभेदान्वयबोधजनिका का आकाङ्क्षा?
3) कथं स्तोकः पाकः, कृदन्तविशेषणत्वात् इति कस्य वचनम्?
4) समानविभक्तिकत्वलक्षणे साजात्यं केन रूपेण ग्राह्यम्?
5) स्वप्रकृतिकत्वं किम्?
6) एकत्वं किम्?
7) वेदाः प्रमाणम् इत्यत्र विभक्तिवाच्यमेकत्वं कुत्रान्वेति?
8) यत्र धातुमात्रस्यैव पाकादौ तात्पर्यं तत्र तद्विशेषणवाचकपदाद् का विभक्तिः भवति?
9) सः सः इत्यत्र तत्पदस्य कः अर्थः?
10) संयोगविभागादिपदानां नैमित्तिकसंज्ञात्वं केन निराकृतम्?
11) संसर्गः संसर्गमर्यादया भासते इत्यत्र भास्धातोः तेप्रत्ययस्य च अर्थः कः?
12) स्तोकं पचति इत्यत्राभेदान्वयबोधजनिका का आकाङ्क्षा?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) जात्याकृतिव्यक्तयः पदार्थः इत्यत्र विरुद्धवचनकत्वस्य, प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इत्यत्र समानवचनकत्वस्य च समर्थनं कुर्वन्तु।
2) समानविभक्तिकत्वं परिष्कुर्वन्तु।
3) घटो नीलघटः, दण्डवान् रक्तदण्डवान्, इत्यादाविव घटो घटः इत्यत्र कथं नाभेदान्वयबोधः इति लिखन्तु।
4) विशेषणविभक्तेरभेदार्थकत्वे धान्येन धनवान् इतिवत् नीलं घटः इत्यादौ कथं नाऽभेदान्वयबोधः इति लिखन्तु।

5) अभेदो यदि भेदत्वावच्छिन्नाभावस्तदाप्रसिद्धिः, यदि च भेदप्रतियोगिताकाभावस्तदा नीलं जलम् इत्यादिवाक्यस्य प्रामाण्यापत्तिः इति ग्रन्थस्य तात्पर्यं लिखन्तु।

6) समासव्यासस्थलीयाकाङ्क्षाज्ञानयोः परस्परबोधे कथं न व्यभिचारः इति प्रतिपादयत।

7) एकः द्वौ इत्यादौ कुतो न भेदान्वयबोधः इति प्रतिपादयत।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) विशेषणविभक्तेरभेदार्थकत्वे घटो न नीलः इत्यादौ नञा नीलाद्यभेदाभाव एव प्रत्याययिष्यते न तु नीलादिभेदः इति ग्रन्थस्य रहस्यं प्रतिपादयन्तु।

2) तादात्म्यस्वरूपं प्रतिपादयन्तु।

3) सम्पन्नो व्रीहिः इत्यादावेकवचनोपस्थितानि नानैकत्वानि प्रत्येकं नानाव्रीहिष्वन्वीयन्ते इत्युक्त्यैव सामञ्जस्ये जातावेकत्वभानोपगमो निरर्थकः इति मतं खण्डयन्तु।

